# .. Navagrahasukta ..

# ॥ नवग्रहसूक्तम् ॥

Document Information

Text title : navagrahasuuktaM

File name : navagraha.itx

Category : sUkta

Location : doc_veda

Author : Vedic Tradition

Language : Sanskrit

Subject : philosophy/hinduism

Transliterated by : Rajagopal Iyer (rajsand at yahoo.com)

Proofread by : Rajagopal Iyer (rajsand at yahoo.com)

Latest update : July 7, 2004, May 29, 2012

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 12, 2016

*sanskritdocuments.org*

# ॥ नवग्रहसूक्तम् ॥

॥ गणेशवन्दना ॥

ॐ शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्व विघ्नोपशान्तये॥

॥ प्राणायामम् ॥

ॐ भूः। ॐ भुवः । ओ३ं सुवः ।
ॐ महः। ॐ जनः। ॐ तपः। ओ३ं सत्यम् ।
ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि ।
धियो यो नः प्रचोदयात् ।
ओमापो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥

॥ संकल्पः ॥

ममोपात्त-समस्त-दुरितक्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थं
आदित्यादि नवग्रह देवता प्रसाद सिद्ध्यर्तं आदित्यादि
नवग्रह नमस्कारान् करिष्ये॥

॥ मन्त्राणि ॥

ॐ आसत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्मयेन सविता रथेनाऽऽदेवो याति भुवना विपश्यन्।
अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् ।
अस्य यज्ञस्य सुक्रतुम् ॥
येषामीशे पशुपतिः पशूनां चतुष्पदामुत च द्विपदाम् ।
निष्क्रीतोऽयं यज्ञियं भागमेतु रायस्पोषा यजमानस्य सन्तु ॥
ॐ अधिदेवता प्रत्यधिदेवता सहिताय आदित्याय नमः ॥ १॥

ॐ आप्यायस्व समेतु ते विश्वतस्सोम वृष्णियम् ।
भवा वाजस्य संगथे॥

अप्सुमे सोमो अब्रवीदन्तर्विश्वानि भेषजा ।
अग्निश्च विश्वशंभुवमापश्च विश्वभेषजीः ।

गौरी मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी ।
अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ।
ॐ अधिदेवता प्रत्यधिदेवता सहिताय सोमाय नमः ॥ २॥

ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम् ।
अपाँ रेताँसि जिन्वति ।
स्योना पृथिवि भवाऽनृक्षरा निवेशनि। यच्छानश्शर्म सप्रथाः ।
क्षेत्रस्य पतिना वयँहितो नेव जयामसि ।
गामश्वं पोषयिन्त्वा स नो मृडातीदृशे ॥
ॐ अधिदेवता प्रत्यधिदेवता सहिताय अङ्गारकाय नमः ॥ ३॥

ॐ उद्बुध्यस्वाग्ने प्रतिजागृह्येनमिष्टापूर्ते सँसृजेथामयञ्च।
पुनः कृण्वँस्त्वा पितरं युवानमन्वाअँसीत्वयि तन्तुमेतम् ॥
इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्यपाँ सुरे ॥
विष्णो रराटमसि विष्णोः पृष्ठमसि विष्णोश्श्नप्त्रेस्थो
विष्णोस्स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा ।
ॐ अधिदेवता प्रत्यधिदेवता सहिताय बुधाय नमः ॥ ४॥

ॐ बृहस्पते अतियदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दिदयच्चवसर्तप्रजात तदस्मासु द्रविणन्धेहि चित्रम् ॥
इन्द्रमरुत्व इह पाहि सोमं यथा शार्याते अपिबस्सुतस्य।
तव प्रणीती तव शूरशर्मन्नाविवासन्ति कवयस्सुयज्ञाः ॥
ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः ।
सबुध्निया उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विवः
ॐ अधिदेवता प्रत्यधिदेवता सहिताय बृहस्पतये नमः ॥ ५॥

ॐ प्रवश्शुक्राय भानवे भरध्वम्। हव्यं मतिं चाग्नये सुपूतम् ॥
यो दैव्यानि मानुषा जनूँषि। अन्तर्विश्वानि विद्म ना जिगाति ॥
इन्द्राणीमासु नारिषु सुपत्नीमहमश्रवम् ।
न ह्यस्या अपरंचन जरसा मरते पतिः ॥

इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः। अस्माकमस्तु केवलः ॥
ॐ अधिदेवता प्रत्यधिदेवता सहिताय शुक्राय नमः ॥ ६॥
ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शंयोरभिस्रवन्तु नः ॥
प्रजापते न त्वदेतन्यन्यो विश्वा जातानि परिता बभूव ।
यत्कामास्ते जुहुमास्तन्नो अस्तु वयँ स्याम पतयो रयीणाम् ।
इमं यमप्रस्तरमाहि सीदाऽङ्गिरोभिः पितृभिस्संविदानः ।
आत्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषा मादयस्व॥
ॐ अधिदेवता प्रत्यधिदेवता सहिताय शनैश्चराय नमः ॥ ७॥
ॐ कया नश्चित्र आभुवदूती सदावृधस्सखा।
कया शचिष्ठया वृता ।
आऽयङ्गौः पृश्निरक्रमीदसनन्मातरं पुनः। पितरञ्च प्रयन्त्सुवः ।
यत्ते देवी निर्ऋतिराबबन्ध दाम ग्रीवास्वविचर्त्यम् ।
इदन्ते तद्विष्याम्यायुषो न मध्यादथाजीवः पितुमद्धि प्रमुक्तः ॥
ॐ अधिदेवता प्रत्यधिदेवता सहिताय राहवे नमः ॥ ८॥
ॐ केतुङ्कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथा ॥
ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् ।
श्येनोगृध्राणाँ स्वधितिर्वनानाँ सोमः पवित्रमत्येति रेभन्।
सचित्र चित्रं चितयन्तमस्मे चित्रक्षत्र चित्रतमं वयोधाम् ।
चन्द्रं रयिं पुरुवीरम् बृहन्तं चन्द्रचन्द्राभिर्गृणते युवस्व ॥
ॐ अधिदेवता प्रत्यधिदेवता सहितेभ्यः केतुभ्यो नमः ॥ ९॥
॥ ॐ आदित्यादि नवग्रह देवताभ्यो नमो नमः ॥
॥ ॐ शान्तिः शान्तिः शान्तिः ॥

Encoded with Accents and proofread by Rajagopal Iyer rajsand@yahoo.com

.. Navagrahasukta ..

was typeset on August 12, 2016

Please send corrections to *sanskrit@cheerful.com*